# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा, नवम्बर/दिसम्बर-२०१६

| | | |
|---|---|---|
| कक्षा- शास्त्री-३ (SEM-5) | प्रश्नपत्र-७ | गुणाः - ७० |
| विषयः- वास्तुशास्त्रम् | CE359 | समयः - ११ तः ०२ |
| दिनाङ्कः - ०१/१२/२०१६ | सन्दर्भग्रन्थः -वास्तुमञ्जरी | |

**॥ प्रथमान्वितिः ॥**

**प्र-१ अधोलिखितेषु कयोश्चित् द्वयोः ससन्दर्भं व्याख्यां कुरुत ।** ०८

१. विष्कुम्भे घटिकास्तिस्रः पञ्च वा वर्जयेत् सुधीः ।
वज्रे तु घटिकास्तिस्रो नव वा परिवर्जयेत् ॥

२. गृहारम्भे सूत्रपाते द्वारं स्तम्भसमुच्छ्रये ।
प्रवेशसमये चेति पञ्चशोभावास्तुपूजनम् ॥

३. भवनस्योदयं क्षेत्रफलेन गुणयेत्सुधीः ।
वसुभिर्विभजेत् शेषोऽधिपतिः शुभः समः ॥

**प्र-२ हस्तलक्षणं देवताप्रयोगसहितं ग्रन्थाधारे विस्तारयत ।** ०८

**अथवा**

**सूत्रपातकिलकरोपणनिर्णयः सविस्तरं दर्शयत ।**

**प्र-३ द्वयोरुपरि टिप्पणीं लिखत ।** ०४

१. दुर्गे सङ्ग्रहणीय वस्तूनि ।

२. आयानां स्वरूपाणि ।

३. गृहारम्भे शुभतिथिवारविचारः ।

४. चापफलानयनम् ।

**प्र-४ लघूत्तरीयाः पञ्च प्रश्नाः समाधेयाः ।** ०५

१. मेषराशेः स्वामी कः ?

२. व्ययाः कति ?

३. धूम्र आयस्थप्रयोगः कुत्र भवति ?

४. नन्दातिथ्यां गृहारम्भे किं फलम् ?

५. वल्मीकयुक्त भूमिगृहनिर्माणे प्रशस्ता भवति न वा ?

६. आधिकमासे गृहारम्भे किं फलम् ?

७. सर्पाकारनगरनिर्माणे किं फलम् ?

**॥ द्वितीयान्वितिः ॥**

**प्र-५ अधोलिखितेषु द्वयोः ससन्दर्भं व्याख्यां कुरुत ।** ०८

१. कुण्डं युगाश्रकं भद्रं सुभद्रं भद्रसंयुतम् ।
प्रतिभद्रे युतं नरं परिधं मध्यभिद्वत् ।
शतांशमष्टहस्तादि चतुर्द्वारादि कारयेत् ॥

२. पुरादिमध्ये बाह्ये च कुर्यादुद्यानमुत्तमम् ।

गृहस्य वाम-दक्षिणे वाप्येक द्वि-त्रि-धनुःशतैः ॥

३. प्रागुत्तरे सर्वतो वा वद्र्धयेन्नान्यतो गृहम् ।

द्वौ स्तम्भौ क्षणमध्ये तु दद्यात् गर्भं न पीडयेत् ॥

**प्र-६ गृहे राजगृहभेदाः ग्रन्थाधारे प्रदर्शयत ।** **०८**

**अथवा**

**वापि-कूपनिर्माणविचारः दर्शयत ।**

**प्र-७ द्वयोरुपरि टिप्पणीं लिखत ।** **०४**

१. राजगृहे अलिन्दप्रमाणम् ।

२. गृहे चित्रकर्मविचारः ।

३. सुन्दरादिषोडशगृहनामानि ।

४. गृहदीपस्थानम् ।

**प्र-८ केषाञ्चित् पञ्चप्रश्नाः समाधेयाः ।** **०५**

१. गृहभूमिखनने मत्स्यं प्राप्यते तत्फलं किम् ?

२. द्वारं स्वयमुद्घाटने किं फलम् ?

३. श्रीपर्णीवृक्षः गृहनिर्माणो शुभं भवति न वा ?

४. पञ्चकनक्षत्रे काष्ठसङ्ग्रहणे किं फलम् ?

५. अश्वशाला राजगृहस्य कस्मिन् भागे स्थापनीया ?

६. शूर्पगृहे शाला कस्यां दिशायां भवति ?

७. अलिन्दयुक्तशालायाः नाम किम् ?

**॥ तृतीयान्वितिः ॥**

**प्र-९ निम्नलिखितेषु द्वयोः सान्वयं व्याख्यां कुरुत ।** **०८**

१. त्रिहस्तान्त पृथु द्वारे शोभा विश्वकरावधि ।

उन विघ्नान्त दैर्घ्या त्रिभूमांत मण्डपोपमा ॥

२. पूर्वेणैन्द्रं जयन्तं च द्वारं सर्वत्र शस्यते ।

याम्यं च वितथं चैव दक्षिणेन विदुर्बुधाः ॥

३. मणिना स्वर्णरूप्येण विद्रुमेण फलेन वा ।

चतुःषष्टिपदैर्वास्तु लिख्येद्वापि शतांशकैः ॥

**प्र-१० कलशचक्रं सोदाहरणं प्रदर्शयत ।** **०८**

**अथवा**

**अर्कषीः देवस्थापनक्रमविचारः स्पष्टयत ।**

**प्र-११ एकस्योपरि टिप्पणीं लिखत ।** **०२**

१. सभानिर्माणविधानम् ।

२. वास्तुद्रव्यानुसारेण पुण्यफलानि ।

**प्र-१२ द्वयोः उत्तराणि देयानि ।** **०२**

१. पश्चिमदिशायाः दिक्पालः कः ?

२. नागवास्तुचक्रं कस्मिन् कार्ये प्रयुज्यते ?

३. प्रासादे शुकनासिकायाः स्थानं कुत्र ?

४. उत्तराफाल्गुनीनक्षत्रे प्रासादारम्भे किं फलम् ?